Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अघोरादिमन्त्रप्रसङ्गात् खङ्गरावणमन्त्रोपि रौद्रत्वसामान्येन मन्त्रदेवताप्रकाशिकोक्तप्रकारेण लिख्यते —

भैरवऋषिः । अनुष्टुप् छन्दः । खङ्गरावणरुद्रो देवता । खां हृत् । खीं शिरः । इत्याद्यङ्गानि । खौं बीजम् । ह्रीं शक्तिः । ध्यानम् —

खण्टाकपालसृणिमुण्डकृपाणखेटखट्वाङ्गशूलडमरूनभयं दधानम् ।
रक्ताङ्गमिन्दुशकलाभरणं त्रिणेत्रं पञ्चाननाब्जमरुणांशुकमीशमीडे ॥

ओं नमः पशुपतये ओं नमो भूताधिपतये ओं नमो रुद्राय लल खड्गरावण विहर विहर सर सर नृत्य नृत्य श्मशानभस्मार्चि(र्चि)तशरीराय घण्टाकपालमालाधराय व्याघ्रचर्मपरिधानाय शशाङ्ककृतशेखराय कृष्णसर्पयज्ञोपवीतिने चल चल वल्ग वल्ग अनिवर्तिकपालिने हन हन भूतान् त्रासय त्रासय मण्डलमध्ये घट्ट घट्ट रुद्रांकुशेन समयं प्रवेशय प्रवेशय आवेशय आवेशय चण्डासिधाराधिपतिः रुद्र आज्ञापयति स्वाहा ॥

खङ्गरावणमन्त्रोयं सप्तत्यूर्ध्वशताक्षरः ।

अयुतद्वितयं जपेत् । घृतसिक्तेन पायसेन दशांशं जुहुयात् पुरश्चरणार्थम् ॥

अथ पूजाविधिः —

प्राक् प्रासादविधानोक्तशैवपीठे खं इति बीजेन मूर्तिं संभाव्य मूलेन समावाह्य समर्चयेत् । अङ्गैः दळमूलेषु प्रथमावृतिः । चुलुकुण्डायै० प्रस्खलन्त्यै० कृष्णपिङ्गळायै० फल्गुन्यै० चिरमल्लायै० मत्तमालिकायै० ठेङ्किण्यै० वज्राङ्कितजटायै० ८ इति द्वितीयावृतिः । मातृभिस्तृतीया । रौद्राय० पिङ्गळाय० श्मशानाङ्काय० भीषणाय० दृढकण्ठाय० भृङ्गिरिटये० आमामर्दाय० महाकालाय० ८ एते अष्टौ द्वारपालाः द्वौ द्वौ पूर्वादिदिक्षु । पुनः कुम्भकर्णाय० अशोकाय० भल्लाटकाय० जातहारकाय० ४ इति कोणेष्वेकैकम् । एवं द्वारपालैश्चतुर्थ्यावृतिः । इन्द्रादिभिः पञ्चमी । इत्थं संपूजयेत् । भूतनिग्रहप्रधानोयं मन्त्रः ॥